# श्री कामाक्षी स्तोत्रं - 1

कामारिकामां कमलासनस्थां
        काम्यप्रदां कंकणचूडहस्ताम् ।
कांचीनिवासां कनकप्रभासां
        कामाक्षिदेवीं कलयामि चित्ते ॥

कांचीनूपुररत्नकंकणलसत्केयूरहारोज्ज्वलां
        काश्मीरारुणकंचुकांचितकुचां कस्तूरिकाचर्चिताम् ।
कल्हारांचितकल्पकोज्ज्वलमुखीं कारुण्यकल्लोलिनीं
        कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 1

कामारातिमनःप्रियां कमलभूसेव्यां रमाराधितां
        कंदर्पाधिकदर्पदानविलसत्सौंदर्यदीपांकुराम् ।
कीरालापविनोदिनीं भगवतीं काम्यप्रदानव्रतां
        कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 2

कादंबप्रमदां विलासगमनां कल्याणकांचीरवां
        कल्याणाचलपादपद्मयुगलां कांत्या स्फुरंतीं शुभाम् ।
कल्याणाचलकार्मुकप्रियतमां कादंबमालाश्रियं
        कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 3

© 2022 Vedam Nadam

गंधर्वामरसिद्धचारणवधूध्येयां पताकांचितां
गौरीं कुंकुमपंकपंकितकुचद्वंद्वाभिरामां शुभाम् ।
गंभीरस्मितविभ्रमांकितमुखीं गंगाधरालिंगितां
कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 4

विष्णुब्रह्ममुखामरेंद्रविलसत्कोटीरपीठस्थलां
लाक्षारंजितपादपद्मयुगलां राकेंदुबिंबाननाम् ।
वेदांतागमवेद्यचिंत्यचरितां विद्वज्जनैरावृतां
कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 5

माकंदद्रुममूलदेशमहिते माणिक्यसिंहासने
दिव्यां दीपितहेमकांतिनिवहां वस्त्रावृतां तां शुभाम् ।
दिव्याकल्पितदिव्यदेहभरितां दृष्टिप्रमोदार्पितां
कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 6

आधारादिसमस्तचक्रनिलयामाद्यंतशून्यामुमां
आकाशादिसमस्तभूतनिवहाकारामशेषात्मिकाम् ।
योगींद्रैरपि योगिनीशतगणैराराधितामंबिकां
कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 7

© 2022 Vedam Nadam

ह्रींकारप्रणवात्मिकां प्रणमतां श्रीविद्यविद्यामयीं
ऐं क्लीं सौं रुचि मंत्रमूर्तिनिवहाकारामशेषात्मिकाम् ।
ब्रह्मानंदरसानुभूतिमहितां ब्रह्मप्रियंवादिनीं
कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 8

सिद्धानंदजनस्य चिन्मयसुखाकारां महायोगिनीं
मायाविश्वविमोहिनीं मधुमतीं ध्यायेत् शुभां ब्राह्मणीम् ।
ध्येयां किन्नरसिद्धचारणवधू ध्येयां सदा योगिभिः
कामाक्षीं कलयामि कल्पलतिकां कांचीपुरीदेवताम् ॥ 9

कामारिकामां कमलासनस्थां
काम्यप्रदां कंकणचूडहस्ताम् ।
कांचीनिवासां कनकप्रभासां
कामाक्षिदेवीं कलयामि चित्ते ॥ 10

॥ इति श्री कामाक्षी स्तोत्रं संपूर्णम् ॥